# गणेशाष्टोत्तरशतनाम स्तोत्र

।। श्रीगणेशाय नम: ।।

यम उवाच

गणेश हेरंब गजाननेति महोहदर स्वानुभवप्रकाशिन् ।

वरिष्ठ सिद्धिप्रिय बुद्धिनाथ वदंतमेवं त्यजत प्रभीता: ।।1।।

अनेकविघ्नांतक वक्रतुंड स्वसंज्ञवासिंश्च चतुर्भुजेति ।

कवीश देवांतकनाशकारिन् वदंतमेवं त्यजत प्रभीता: ।।2।।

महेशसूनो गजदैत्यशत्रो वरेण्यसूनो विकट त्रिनेत्र ।

वरेश पृथ्वीधर एकदंत वदंतमेवं त्यजत प्रभीता: ।।3।।

प्रमोद मोदेतिनरांतकारे शडूर्मिहंतर्गजकर्ण ढुण्ढे ।

द्वे द्वारिसिन्धो स्थिरभावकारिन् वदंतमेवं त्यजत प्रभीता: ।।4।।

विनायक ज्ञानविघातशत्रो पराशरस्यात्मज विष्णुपुत्र ।

अनादिपूज्याखुग सर्वपूज्य वदंतमेवं त्यजत प्रभीता: ।।5।।

वैरिंच्य लम्बोदर धूम्रवर्ण मयूरपालेति मयूरवाहिन् ।

सुरासुरै: सेवितपादपद्म वदंतमेवं त्यजत प्रभीता: ।।6।।

वरिन्महाखुध्वज शूर्पकर्ण शिवाज सिंहस्थ अनंतवाह ।

दितौज विघ्नेश्वर शेषनाभे वदंतमेवं त्यजत प्रभीता: ।।7।।

अणोरणीयो महतो महीयो रवेर्ज योगेशज ज्येष्ठराज ।

निधीश मन्त्रेश च शेषपुत्र वदंतमेवं त्यजत प्रभीता: ।।8।।

वरप्रदातरदितेश्च सूनो परात्पर ज्ञानद तारवक्त्र ।

गुहाग्रज ब्रह्मप पार्श्वपुत्र वदंतमेवं त्यजत प्रभीता: ।।9।।

सिन्धोश्च शत्रो परशुप्रयाणे शमीशपुष्पप्रिय विघ्नहारिन् ।

eAstroHelp

दूर्वाभरैरर्चित देवदेव वदंत त्यजत प्रभीता: ।।10।।

धिय: प्रदातश्र्च शमीप्रियेति सुसिद्धिदातश्र्च सुशांतिदात: ।

अमेयमायामितविक्रमेति वदंतमेवं त्यजत प्रभीता: ।।11।।

द्विधा चतुर्थिप्रिय कश्यपाच्य धनप्रद ज्ञानपदप्रकाशिन् ।

चिंतामणे चित्तविहारकारिन् वदंतमेवं त्यजत प्रभीता: ।।12।।

यमस्य शत्रो ह्याभिमानशत्रो विधेर्ज हंत: कपिलस्य सूनो ।

विदेह स्वानंदज योगयोग वदंतमेवं त्यजत प्रभीता: ।।13।।

गणस्य शत्रो कपिलस्य शत्रो समस्तभावज्ञ च भालचन्द्रं ।

अनादिमध्यांतमय प्रचारिन् वदंतमेवं त्यजत प्रभीता: ।।14।।

विभो जगद्रूप गणेश भूमन् पुष्टे: पते आखुगतेति बोध: ।

कर्तुश्र्च पातुश्व तु संहरेति वदंतमेवं त्यजत प्रभीता: ।।15।।

इदमष्टोत्तरशतं नाम्नां तस्य पठंति ये ।

श्रृण्वंति तेषु वै भीता: कुरुध्वं मा प्रवेशनम् ।।16।।

भुक्तिमुक्तिप्रदं ढुण्ढेर्धनधान्यप्रवर्धनम् ।

ब्रह्मभूतकरं स्तोत्रं जपन्तं नित्यमादरात् ।।17।।

यत्र कुत्र गणेशस्य चिन्हयुक्तानि वै भटा: ।

धामानि तत्र संभीता: कुरुध्वं माप्रवेशनम् ।।18।।

eAstroHelp